M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Rel. / Ser. 50

Title: Tadagādi Pratiṣṭha Prayoga

JJ

50

Tadapādi Pratisthā Prayoga			Title
			Author
			Editor
			Year, Vols.
			Publisher
50			Remarks

॥श्रीगणेशाय नमः॥ अथ शौनकोक्त तडागादि प्रतिष्ठा प्रयोगः॥ तत्र पूर्वदिने कूर्ममकरौ राजतौ
सौवर्णौ मत्स्य दुंदुभौ ताम्रौ कुलीर मंडुकौ आयसं शिंशुमारकं॥ वासोन वचठं सकूर्च लाजाना-
दधि पयो घृतं॥ चोप कल्पस्कृत निसक्रियः पवित्रपाणिः सभार्यः॥ ॥ प्राणानायम्य देश
कालौ संकीर्त्य॥ श्वः करिष्यमाण तडागादि प्रतिष्ठांगत्वेनाद्योपोषणं करिष्य इति संकल्पं
कुर्यात्॥ परेद्युः सपत्नीको देशकालौ संकीर्त्य स्वकृत तडागादिस्य वर्लोकभोगार्द्धिद्वलब्धि
द्धि द्वारा श्रीपरमेश्वर प्रीत्यर्थं शौनकोक्तविधिना प्रतिष्ठां करिष्ये। इति संकल्प्य तदंगत्वे-
न गणपति पूजन मातृका पूजन नांदीश्राद्ध स्वस्ती वाचन आचार्यादि वरणं करिष्य इति सं
कल्प्य॥ क्रमेण तत्कृत्वा गंधाद्यलंकृतमुदकुंभं पुरस्कृत्य सपत्नीकः सबांधवः स्वस्तिनो मि
मीतामिति वेद घोषणे वादित्रनादेन च तडागादि देशं गत्वा तं प्रदक्षिणी कृत्य विताना लं
कृतां मुर्वं प्रविश्य तत्रापी यां यः दत्र स्थं क्षालेमिति सर्षपान्विकीर्य शुचीवो हव्येति मंत्रे-
ण पंचगव्येन मुर्वं प्रोक्ष्य आपोहिष्ठेति तृचेनाद्भिः प्रोक्ष्य॥ स्वस्त्ययनं तार्क्ष्यमिति प्रार्थ्य क

तन्मुर्वी मध्ये कुंडं स्थंडिलं वा हस्तमात्रं तत्पूर्व भागे हस्तोच्छ्रायां चतुरस्रां वेदिं कृत्वा ततः कुंडस्य
स्थंडिलस्य वा पश्चिमतः उपविश्य मंडुकादि नाम मंत्रोच्चारणं कुर्यात्॥ तेषु कृत्वा दिक्षु जोमंडू
कादि देवताभ्यो नमः इति कुर्यात्॥ स्थंडिलोपलेपनादि पूर्वकमग्निं प्रतिष्ठाप्य॥ चत्वारिंशं
गेण मंत्रेण ध्यात्वा कलशस्थापनादि वरुण पूजनांतं कृत्वा॥ अग्नेः पश्चिमतः उपविश्य
समद्य समादाय ध्यानं कुर्यात्॥ चक्षुषी आज्येनेत्यंत उक्त्वा अत्र प्रधानं आपः पंचविंश
तिवारं आज्येन आपो नववारं स्रुक्भिः वरुणं विंशद्वारं माज्येन वरुणं अष्टवारं चरुणा
शेषेण स्विष्टकृतमित्यादि पात्रासादने चरु स्थाल्यां सह स्रुक् लाजाः स्थाल्यौरप्यासादनं
प्रणीता प्रणयनांते अग्नेरीशानदेशे महीद्यौरिति भूमिं स्पृष्ट्वा ओषधय इति धान्यं प्रक्षि
प्य आ कलशेति कलशं इमं मे गंगे इति गंगादि जलेन पूर्य युवं वस्त्राणीति वाससा वेष्टिल गंध
द्वारामिति गंधाद्यर्चितं कृत्वा पंचपल्लव दूर्वा यव पंचरत्न हिरण्य फलानि अश्वत्थे वट-
सादि तत्र कलशे प्रक्षिप्य मंडूकादि रूपाणि तत्र प्रक्षिपेत्॥ पूर्णाद्वी पूर्णपात्रं नि

ध्याय तस्मिन्कलशे स्कंधवर्णविहितं प्रतिमावरुणं संपूज्य॥ कलशस्य मुखे विष्णुरित्यभिमंत्र्य॥
२ देवदानवसंवादे इति प्रार्थ्य॥ पवित्रं तद्धितिसृपेत्तु छीद्यावित्रिंशद्वारनिस्त्यतां वद्वारं प्रो
क्ष्य॥ पयसिप्राप्य येत्॥ ततः पयोदधिमालोडितसक्तुने कस्या स्थाल्यामन्यस्यां स्थाल्यां मा
ज्यमिश्रितलाजांश्च पंक्तिव्याज्यनिर्वापादिकाले आज्येन सह चरुसरं कुलाजानां पर्य
ग्निकरणं संमार्गेति सक्तून् लाजांश्चाग्नावधिश्रित्य अग्निमिघारणादि बर्हिसादनां
ज्य दक्षिणतः अंतरं मुदक् सं स्थाप्य कृत्वा चरुमभिघारणांतः बाहिर्विस्रादयेत्॥ ततः आ
ज्यभागांते कृते प्रधाना हुतीर्जुहुयात्॥ आपोहिष्ठेति नवाना मंबरिषः सिंधुद्वीपऋ रामः
षिः आपो देवता गायत्री छंदः॥ पंचमीवर्धमानास्य प्रतिष्ठा अंते द्वे अनुष्टुभौ तडा २
गादिप्रतिष्ठाप्रधानाज्यहोमे विनियोगः आपोहिष्ठामयो भुवः०॥ चक्षसे स्वाहा॥१॥ यो वः
शिवतमो रसः० मातरः स्वाहा॥२॥ तस्मा अरंगमाम वो० च नः स्वाहा॥३॥ शंनो देवीरभिष्ट
ये० वंतु नः स्वाहा॥४॥ ईशाना वार्याणां मेषजे स्वाहा॥५॥ आप्सु मे सोमो अब्रवीत्० भुवं

स्वाहा॥६॥ आपः पृणीत भेषजं० दृशे स्वाहा॥७॥ इदमापः प्रवहत० नृतं स्वाहा॥८॥ आपो
अद्यान्वचारिषं० वर्चसा सौ स्वा॥१०॥ आपो अस्मान्मातरः शुंधयंतु० शुचिरापूतएमि
॥१॥ द्रप्सश्चस्कंद प्रथमां अनु द्यूनि पंच योनिमनु यश्च पूर्वः॥ समानं योनिमनु संचरंतं
द्रप्सं जुहोम्यनु सप्त होत्राः॥२॥ यस्ते द्रप्सः स्कंदति यस्ते अंशुर्बाहुच्युतो धिषणाया उप
स्थात्॥ अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतं॥३॥ यस्ते द्रप्सस्कन्नो
यस्ते अंशुरवश्च यः परः स्रुचा॥ अयं देवो बृहस्पतिः सं तं सिंचतु राधसे॥४॥ पयस्वती
रोषधयः पयस्वन्मामकं वचः॥ आपां पयस्वदित्पयस्तेन मा सह शुंधत॥५॥ समुद्रादूर्मिरित्ये
कादशर्चस्य सूक्तस्य॥ वामदेव ऋषिः॥ आपो देवता त्रिष्टुप् छंदः॥ अस्या जगती तडागा
दि०॥ समुद्रादूर्मिर्मधुमां उदार०॥१॥ वयं नाम प्रब्रवामा घृतस्य०॥२॥ चत्वारि शृंगा त्रयो
अस्य पादाः०॥३॥ त्रिधा हितं पणिभिर्गुह्यमानं०॥४॥ एता अर्षंति हृद्यात्समुद्रात्०॥५॥ स
म्यक्स्रवंति सरितो न धेनाः०॥६॥ सिंधोरिव प्राध्वने शूघनासो॥७॥ अभिप्रवंत समनेव

चोदत्॥ ८॥ कन्या इव वहतुमेतवा उ०॥ ९॥ अभ्यर्षत सुष्टुतिं गव्यमाजिं०॥ १०॥ धामं ते विश्वं
भुवनमधि श्रितं०॥ १२॥ ततो दध्याज्यं त्रिर्नोपस्तीर्य सकृत्पोद्धिरवदाय द्विरभिघार्य व संद्विर
३ भिघारयेत्॥ एवं पुनः अवदायनवा हविर्जुहुयात्॥ प्रस्कण्व आपरात्ति न वर्चस्य स्कन्नस्य सं
धुद्वीप ऋषिः आपो देवता जगती छंदः तडागादि प्रतिष्ठाप्रधानस्य होमे० प्रस्कण्व आपो मदि
मानमुत्तमं० प्रतिरद दरुणोया तवेपथं०॥ दिविष्य नोय तते मत्यो परिः०॥ २॥ अभि त्वा सिं
धोशिशुमिन्न मातरो०॥ ३॥ इमं मे गंगे यमुने सरस्वति०॥ ५॥ तृष्टामया प्रथमं यातवे सजू०॥ ६॥ ऋ रा.मा.
जीत्येनी रुशती महित्वा०॥ ७॥ स्वश्वा सिंधुः सुरथा सुवासाः॥ ८॥ सुखं रथं युयुजे सिं ३
धुरश्विनं०॥ ९॥ ततो दक्षिणेन तडागस्य यजमानस्याचार्यो लाजानादाय प्राग्भागे गत्वा तत्रो
पविश्य मृ वं प्रत्याहस्तेन लाजानोपाय लाजानां नवाहुतीर्जुहुयात्॥ अंबय इति नवानां मेधा
तिथि ऋषिः आपो देवता आद्यास्तिस्रो गायत्र्यः चतुर्थी पुरउष्णिक् पंचम्यनुष्टुप्॥ षष्ठी प्र
तिष्ठा अंत्यास्तिस्रोनुष्टुभः तडागादि चतुर्दिक्षु लाजाहोमे०॥ अं ~~[illegible]~~
बयो यं स्यध्वभिः॥ १॥

अमूर्या उप सूर्ये०॥ २॥ अपो देवीरुप ह्वये०॥ ३॥ अप्स्वंतरमृतमप्सु भेषजं०॥ ४॥ अप्सु
मे सोमो अब्रवीत्॥ ५॥ आपः पृणीत भेषजं०॥ ६॥ इदमापः प्रवहत०॥ ७॥ आपो अद्यान्वचा
रिषं॥ ८॥ सं माग्ने वर्चसासृज०॥ ९॥ एवमुत्तरपश्चिमदक्षिणदिक्षु नवनवाहुतीर्जुहु
यात्॥ उक्तेभ्यस्तु लाजाहोमेषु सर्वत्र अभ्यादध्यात् न ममेति त्यागः॥ अथाग्नेः पश्चिमत उ
पविश्य त्रिंशदाज्याहुतीर्जुहुयात्॥ नहि ते इति त्रिंशदृचस्याजीगर्तिः शुनःशेप ऋषिः वरुणो
देवता॥ आद्याद्वित्रिष्टुभः विंशतिर्गायत्र्यः तडागादि लोडहोमे०॥ नहि ते क्षत्रं न सहो न
मन्युं०॥ १॥ अबुध्ने राजा वरुणो वनस्य०॥ २॥ उरुं हि राजा वरुणश्चकार०॥ ३॥ शतं ते राजन्
भिषजः सहस्रं०॥ ४॥ अमी य ऋक्षा निहितास उच्चा०॥ ५॥ तत्त्वा यामि ब्रह्मणा वंदमा
नः॥ ६॥ तदिन्नक्तं तद्दिवा मह्यमाहु०॥ ७॥ शुनःशेपो ह्यह्वद्गृभीतः॥ ८॥ अव ते हेळो व
रुण नमोभिः॥ ९॥ उदुत्तमं पाशमस्मत्०॥ १०॥ यच्चिद्धि ते विशो यथा०॥ ११॥ मा नो
वधाय हत्नवे०॥ १२॥ नायते मनो०॥ १३॥ परा हि मे विमन्यव०॥ १४॥ कदा क्षत्र

श्रियं नर० ॥१५॥ तदित्समानमेशाते० ॥१६॥ वेदा यो वीनां पद० ॥१७॥ वेद मासो धृतव्रतो० ॥१८॥
वेद वातस्य वर्तनि० ॥१९॥ निषसाद धृतव्रतो० ॥२०॥ अतो विश्वान्यद्भुता० ॥२१॥ स नो वि
४ श्वाहा सुक्रतु० ॥२२॥ बिभ्रद्द्रापिं हिरण्ययं० ॥२३॥ न यं दिप्संति दिप्सवो० ॥२४॥ उत यो मानु
षेष्वा० ॥२५॥ परा मे यंति धीतयो० ॥२६॥ सं नु वोचावहै पुनः० ॥२७॥ दर्शं नु विश्वदर्शतं० ॥२८॥
इमं मे वरुण श्रुधी हवं० ॥२९॥ त्वं विश्वस्य मेधिर० ॥३०॥ स्ववंत्र वरुणायेदं न मम ॥ ततश्चरो
रवदानसंप्रदाय्याहुतीर्जुहुयात् ॥ प्रसम्राजे इत्यस्य षडर्चस्य सूक्तस्यात्रिः स्यावाश्व ऋषिः वरुणो
देवता ॥ त्रिष्टुप्छंदः ॥ तदुमादि प्रधानचरुहोमे विनि० ॥ प्रसम्राजे बृहदर्चा गभीरं० ॥१॥ वनेषु व्य ता० म० ४
न्तरिक्षं ततान० ॥२॥ नीचीनवारं वरुणः कवंधं० ॥३॥ उनत्ति भूमिं पृथिवीमुत द्यां० ॥४॥ इमामू
ष्वासुरस्य श्रुतस्य० ॥५॥ इमामू नु कवितमस्य मायां० ॥६॥ अर्यम्यं वरुण मित्र्यं वा० ॥७॥
कितवासो यद्० ॥८॥ वरुणायेदं न मम ॥ ततो दध्यक्षुपस्तीर्य स्रुवेणाज्यमादाय सकुला
ज्ञाचरुणामुत्तरार्धात्सि वस्लकृद वकायहविरभिघार्य स्विष्टकृतादि प्रायश्चित्त होमान्कृत्वे

कितवासो० ॥८॥ ॥ इति होमविधिः ॥ ॥ तटाक पश्चिमभागे होममेकं ॥ ॥ उत्तरभागे हो
ममेकं ॥ ॥ एवं होमत्रयं कुर्यात् ॥ अथवा होमत्रयं एकतंत्रेण कुर्यात् ॥ सर्वतंत्रेजु
होति ॥ ॥ सौवर्णौ कूर्ममकरौ राजतौ मत्स्यदुंदुभौ ॥ ताम्रौ कुलीरमंडूकौ आयसो शि
शुमारकः ॥१॥ एवमासाद्य तत्सर्वं अपां देवे विनिःक्षेपते ॥ तटाकः पश्चिमे भागे आ
ज्यहोमं चरुं कृतो ॥२॥ पूर्वभागे दधिसक्तु उत्तरे लाजहोमकृत् ॥ एवं विधिना कु
र्यात् ॥ ॥ अथ होमत्रयं पश्चिमदेशे एकतंत्रेण कुर्यात् ॥ ॥ इति प्रधानहोमः ॥
अष्टौ लोकपालान् अष्टावाज्याहुती हुत्वा ॥ नाममंत्रैरेतादेवताभ्याज्येन हुत्वा उ
त्तरपूजां कृत्वा स्विष्टकृदादि रुद्रप्रहरणांतं कृत्वा सहस्राहुतीर्जुहुयात् ॥ ॥ ततः ब
लीदानं ॥ ॥ अथ पूर्णाहुति होमः ॥ ॥ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य वा
मदेव आप त्रिष्टुप् पूर्णाहुति होमे विनि० ॥ ॐ समुद्रादूर्मिः० ॐ मिस्वाहेति हुत्वा वसो

धारां तु कुर्यात् ॥ ॥ यजमानोऽन्वारब्धः जलाशयं प्रदक्षिणीकृत्य जलाग्न्योराज्यधारां
कूं॰ शां॰ बहिः समंतात्पातयित्वा ॥ ततः जलाशयं वस्त्रेण सूत्रेण वा वेष्ट्य गंधपुष्पादिभिः
संपूज्य तत्र एकां गां प्रदक्षिणीकृत्य ईशान्यामानीय तस्याः पुच्छे पित्रादितर्पणं
५ कुर्यात् ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ माता पितामही चैव तथैव प्रपि-
तामहीः ॥ मातामहस्तत्पिता च प्रमातामहकादयः ॥ ते सर्वे तृप्तिमायांतु जलादा-
नेन मेऽधुना ॥ आब्रह्मस्तंबपर्यंतं आब्रह्मभुवनाल्लोकादिदमस्तु कूपोदकं ॥ इति राम:
तर्पणं विधाय गां संपूज्य इरावती धेनुमतीति मंत्रेणोत्सृजेत् ॥ ॥ अथ कूपोत्स- ५
र्जनं ॥ ॥ अथाद्येत्यादि॰ पुण्यतिथौ मम इह जन्मांतरे वा मम सकलकुटुंबस्य प-
शोः क्षेमस्थैर्यमायुरारोग्यैश्वर्यादिभिरुचितवृद्ध्यर्थं समस्तपापक्षयार्थं सं-
पादितस्य जलाशयवापीकूपस्यादिसोपानकपाटादिभिर्युक्तखननसमये दुष्ट-

पाषाणास्थ्यादिदुष्टद्रव्यत्यागसमये मध्यस्थितप्राणिवधादिदोषनिरासार्थं वरुणलोकसु-
खावाप्तये जलाशये वापनद्वारा कृतानां पातकानां प्रायश्चित्तार्थं पितृणां मम स-
हितं ब्रह्मलोके चिरकालनिवाससिद्ध्यर्थं पुत्रपौत्राद्यभिवृद्ध्यर्थं जलाशयोत्सर्ज-
नमहं करिष्ये ॥ ॥ ततः कूपप्रार्थना ॥ ॥ इदं जलं मया दत्तं पिबंतु सुखिनो जनाः ॥ ते-
न मे चास्तु निःश्रेयः प्रसादो ह्यप्पांपते ॥१॥ पापं मास्तु पंतं यस्मिन्भूतानि कृमि-
कीटकाः ॥ तस्य वं नश्यमे देव अप्पांपते नमोऽस्तु ते ॥२॥ इत्युच्चार्य जलमुत्सृजेत् ॥
ततः अनिवार्य जलाशयं जलं कार्यं ॥ तेन आत्मस्य नाम्ना वा तन्मध्ये पतितानां प्रा-
णिनां मृतानां दोषो नास्ति ॥ ततः जलमुद्धृत्य तज्जलाचमनं कार्यं ॥ स्वस्त्ययनं ता-
र्क्ष्यमिति मंत्रान्जपेत् ॥ ततः श्रेयसंपाद्य ब्राह्मणान् षोडशोपचारैः पूजयेत् ॥ द-
क्षिणां दत्वा ॥ ततः कुंडोपक्रमे यजमानः कंबलासने प्राङ्मुखोपविश्य उदङ्मुखो

कूं॰ शां॰ ६

ऋत्विजो तिष्ठेत्॥ अभिषेकमंत्रान् अभिषिंचेत्॥ तत्र मंत्राः॥ समुद्रज्येष्ठा इति॰ ४ आपो हि ष्ठे
ति तिसृभिः॥ आयं नामिति देवस्य त्वेति॰॥ सुरास्त्वामभिषिंचंतु॥ इत्यादि पौराणिकैर्मंत्रैर
भिषिंचेत्॥ इति अभिषेकः॥ स्नानं कृत्वा विभूतिं धृत्वालंकृतः स्थापितदेवतासमीपभागस
प्रार्थनां कुर्यात्॥ वरुणाय नमस्तुभ्यं अपांपतिने नमस्कृते॥ मत्कृतं जलाशयं पूर्णं जलेन त्व
त्प्रसादतः॥ इति प्रार्थ्य॥ कूपमध्ये गंगागोतम्यादिजलं निक्षिपेत्॥ गंगे च यमुने चैव पाव
यंतु जलाशयं॥ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा॥ तानि सर्वाणि मे कूपं पावयंतु च
नित्यशः॥ कृष्णवेण्या तथा भीमा तुंगभद्रा सरस्वती॥ २॥ शरयूगंडकी रेवा गौतमी भवनाश
नी॥ अन्यानि तीर्थरूपाणि कूपं मे पावयंतु च॥ ३॥ इति संप्रार्थ्य॥ सौवर्णं कूर्ममकरौ राज
तौ मत्स्यदुंदुभौ॥ ताम्रौ कुलीरमंडूकौ शिशुमारं च आयसं॥ मत्स्यकूर्मजलचरप्रतिमा
जलाशये निक्षिपेत्॥ स्वशक्त्या॥ जलाशयोप्रत्यग्भागे वस्त्राय प्रसन्नाजे र हदितिसू
क्तं जपेत्॥ ततः वृद्धकधारया जलाशयं त्रिःप्रदक्षिणीकृत्य सहबांधवैः॥ अथ जैयेमा

राम: ६

नौ जलाशये जलांजलिं संपूर्य देवपितृमनुष्यादयः॥ प्रियंतां त्युक्त्वा जलं क्षिपेत्॥ जला
शये देवपितृमनुष्याः तृप्यंतु॥ प्रणीतापात्रनिनयनांतं त्वा के पीठे देवता विसर्जयेत्॥ त
त्सर्वं आचार्याय दद्यात्॥ इमां धियं शिक्षमाणस्य देव॰ ऋक्॥ पात्रप्रणायनं ततः॥ अ
ग्निं संपूज्य॥ गच्छ गच्छेति विसर्जेत्॥ ज्ञानतो ज्ञानतो वापि कर्म यद्दूषितं मया कृतं॥ तत्स
र्वं पूर्णतामेव प्रसादात्त्वज्जगदीश्वर॥ यस्य स्मृत्या॰॥ मया यत्कृतं कूपोद्यापनाख्येन
कर्मणा भगवान्॥ जगदीश्वरः प्रीयतां न मम॥ कर्मणः सांगतासिद्ध्यर्थं यथाशक्ति
ब्राह्मणान् भोजयेत्॥ शतं तदर्द्धं अष्टाविंशतिं तच्च वा भोजयेत्॥ आचार्याय गांप
यस्विनी वस्त्राभरणानि दद्यात्॥ ऋत्विजादिब्राह्मणान् दक्षिणां दद्यात्॥ आशिषो
गृहीत्वा बंधुभिः सह भुंजीत॥ ॥ इति शौनकोक्त वापीकूपतडागादि उद्यापनप्रयोगः॥
अथ वापीकूपादिशुद्धिः॥ ॥ कूपादेरुत्सर्गाकरणदोषउक्तो भविष्ये॥ सदा जलं पवि
त्रं स्यादपवित्रसंस्कृतं॥ तथा॥ वापीकूपतडागादौ यज्जलं स्यादसंस्कृतं॥ अपेयं

कुं० शां० ८

यन्दे वेस्य वैपीत्याचां श्रयमाचरेत्॥ अथोपद्यान प्रायश्चितं॥ हस्त प्रातिः चाले पुष
कुंभोद्धार पंच गव्य प्रक्षेपः॥ रावेम त्रपुरी वा दोच्च मरुधिरादिम हस्ते पंचेत्रिंश नुकुंभोज
लोद्धार पूर्वक गोमूत्रादि प्रक्षेपादि मार्जनं॥ ॥ रतिवापीकूपादि शुद्धिः॥ अथ संभो
रा॥ सुवर्ण प्रतिमा वेरुता १ गंगा २ गोतमी ३ भीमा ४ कृष्णा ५ वेण्या ६ स्वरस्वती ७
यमुना ८ नर्मदा १० रजत प्रतिमा मत्स्य १ दुंदुभ १ ताम्र प्रतिमा कुलीर १ मंडूक १ लोहप्र
मा शिशुमार १ सर्प २ कलश ३ पर ऊीर वस्त्र हात ४ वेष्टनार्थ सूत्र गुंजेडी १ सप्तम२ रा म: ८
त्तिका १ प्रतिमार्थ वस्त्रं १ ४ हात २ नारेळ २ सुपारी शेर १ खारीक खोबरें १ गुगुळ १
वाती १ गंध अक्षता १ पुष्पें १ नवग्रह समिधा ८ ० पंचामृत १ पंच गव्य १ पंच पल्ल
व होम द्रव्य पायस — पलाश समिधा १०० दधि स्वस्कु १ साकी चळा ह्या १ तील
अक्षदेर १ तूप शेर १ चरु शेर १ दिवे २० गायत्रस्य कलस १ = अभिषेक वस्त्र १ दक्षणा॥॥
ईद पुस्तकं गवादे स्यपनामक गोपाळ भट स्य पुस्तके समाप्तः॥ ०॥ ०॥ ०